# पुरुषसूक्त-
# विष्णुसूक्त-
# श्रीसूक्त-
# भूसूक्त-
# नीलासूक्त



अथ माध्यंदिनशाखीय-

# पुरुषसूक्त-विष्णुसूक्त-श्रीसूक्त भूसूक्त-नीलासूक्तानि ।

संस्करण : मार्च २००९, सम्वत् २०६५

मूल्य : ५ रुपये मात्र।

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,™

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग,

मुंबई - ४०० ००४.

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

Printers & Publishers :

Khemraj Shrikrishnadass,
Prop. Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
Email : Khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s. Khemraj Shrikrishnadass, Proprietors Shri Venkateshwar Press, Mumbai - 400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune - 411 013.

श्रीगणेशायनमः॥ ॥अथमाध्यंदिनीयपुरुषसू
क्तप्रारंभः ॥ हरिः॑ॐसहस्रशीर्षापुरुषः सहस्राक्षः
सहस्रपात् ॥ सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्द
शाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभा
व्यम् ॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति
॥ २॥ एतावानस्यमहिमातोज्ज्यायाँश्च पूरुषः॥
पादोस्यविश्वाभूतानि त्रिपादस्यामृतन्दिवि
॥ ३ ॥ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभव
त्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशने

अभि ॥ ४ ॥ ततोव्विराडजायतव्विराजो अधिपू
१ रुषः ॥ सजातोऽअत्यरिच्यत पश्चाद्भूमिमथोपुरः
॥ ५ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदा
ज्यम् ॥ पशूँस्ताँश्चक्रेव्वायव्यानारण्यान्ग्राम्या
श्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचः सामा
निजज्ञिरे ॥ छन्दाᳬंसिजज्ञिरे तस्माद्यजुस्त
स्मादजायत ॥७॥ तस्मादश्वाऽअजायन्तयेके १
चोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽ
अजावयः ॥८॥ तंय्यज्ञम्बर्हिषिप्रोक्षन्पुरुषञ्जात

मंग्ग्रतः। तेनंदेवाऽअंयजन्तसाद्ध्याऽऋषंयश्चये
॥९॥ यत्पुरुंषुंव्व्यदंधुः कतिधाव्व्यंकल्प्पयन् ।मु
खङ्किमंस्स्यासीत्किम्बाहूकिमूरू पादांऽउच्च्येते
॥ १० ॥ ब्राह्मणोस्स्यमुखंमासीद्बाहूराजन्न्यः
कृतः ॥ ऊरूतदंस्स्ययद्वैश्यः पद्भ्याᳬशूद्रोऽ
अंजायत ॥ ११ ॥ चन्द्रमामनंसो जातश्चक्षोः
सूर्य्योऽअजायत ॥ श्श्रोत्राद्वायुश्च्चंप्राणश्च
मुखादग्निरंजायत ॥ १२ ॥ नाभ्याऽआसीद
न्तरिंक्षᳬशीष्ष्णोंद्यौः समंवर्तत ॥ पद्भ्याम्भू

मिर्द्दिशः श्रोत्रात्तथा लोकाँ २ऽअकल्पयन् ॥ १३ ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ वसन्तो
स्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥
॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि
प्रथमान्यासन् ॥ ते ह नाकम्महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

इति पुरुषसूक्तं समाप्तम् ।

# अथ विष्णुसूक्तप्रारम्भः ।

ॐ विष्णोर्नुकंवीर्य्याणिप्रवोचुंयःपार्थिवानि विममे रजा७सियोअस्कंभायदुत्तंर७सधस्थं विचक्रमाणस्त्रेधोरुगायोविष्णो रराटंमासि वि ष्णोःपृष्ठमंसि विष्णोश्न्यप्त्रेस्थोविष्णोस्स्यूरासि विष्णोर्ध्रुवमंसिवैष्णवमंसिविष्णवेत्वा ॥ तदंस्यप्रि यमभिपाथोअश्यांनरोयत्रदेवयवोमदन्ति । उरु क्रमस्यसहिबंधुरित्थाविष्णोःपदे पंरमेमध्वउत्सः

वि० प्रतद्विष्णुंस्तवतेवीर्य्याय मृगानभीमःकुचरोगिरि सू०
३ ष्ठाः यस्योरुषुत्रिषु विक्रमणेष्वधिक्षियंति भुवं
नानिविश्वांपुरोमात्रयातनुवांवृधान नते महि
त्वमन्वश्नुवन्ति उभेतें विद्म रजसीपृथिव्यावि
ष्णोदेवत्वंपरमस्यवित्से । विचंक्रमेपृथिवीमेषएतां
क्षेत्रायविष्णुर्मनुषेदशस्यन्ध्रुवासो अस्यकीरयो
जनास उरुक्षितिꣳसुजनिमाचकार त्रिर्देवःपृथि २
वीमेषएतांविचंक्रमेशतर्चसंमहित्वा ॥ प्रविष्णुर
स्तुतवसस्तवीयान्त्वेषꣳह्यस्यस्थविरस्यनाम ।

अतोदेवाअवन्तुनोयतोविष्णुर्विचक्रमे ॥ पृथि
व्यास्सुप्तधामभिः ॥ इदंविष्णुर्विचक्रमेत्रेधानि
दधेपदम् । समूढमस्यपाꣳसुरे । त्रीणिपदाविच
क्रमेविष्णुर्गोपाअदाभ्यः। अतोधर्माणिधारयन् ।
विष्णोः कर्माणिपश्यतयतोव्रतानिपस्पशेइन्द्रस्य
युज्यस्सखा । तद्विष्णोःपरमंपदꣳसदा पश्यं
तिसूरयः । दिवीवचक्षुराततम् । तद्विप्रासोविप
न्यवोजागृवाꣳसस्समिंधते । विष्णोर्यत्परमं

पदंपर्याप्त्या अनंतरायायुसर्वुस्तोमेतिरात्रमुत्तम
महंर्भवति सर्वुस्याप्त्यै सर्वस्यजित्यैसर्वमेवते
नांप्नोतिसर्वं जयति ॥

इति विष्णुसूक्तं समाप्तम् ।

## अथ श्रीसूक्तप्रारम्भः । ।।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥
चन्द्रां हिरण्मयींलक्ष्मींजातवेदो ममावह ॥ १ ॥
तांमआवहजातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ॥
श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम् ॥ ३ ॥
कांसोस्मितां हिरण्यप्राकारामार्द्रांज्वलन्तीं
तृप्तां तर्पयन्तीम् ॥ पद्मेस्थितां पद्मवर्णां

श्री० तामिहोपह्वये श्रियम् ॥ ४ ॥ चन्द्रांप्रभासां य सू०
५ शसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ॥
तां पद्मनेमिं शरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्य
तां त्वां वृणोमि ॥ ५ ॥ आदित्यवर्णे तपसोऽधि
जातः वनस्पतिस्तव वृक्षोऽथ बिल्वः ॥ तस्य फ
लानि तपसा नुदन्तु मायांतरायाश्च बाह्याऽअ
लक्ष्मीः ॥ ६ ॥ उपैतु मांदेवसखः कीर्तिश्च म
णिना सह ॥ प्रादुर्भूतो सुराष्ट्रेऽस्मिन्कीर्तिमृद्धिं द ५
दातु मे ॥ ७ ॥ क्षुत्पिपासामलांज्येष्ठाऽअलक्ष्मी

नाशयाम्यहम् ॥ अभूतिमसमृद्धिं च सर्वां निर्णुद
मे गृहात् ॥८॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करी
षिणीम् ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रि
यम् ॥ ९ ॥ मनसः काममाकूतिं वाचः सत्यमशी
महि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः
॥ १० ॥ कर्दमेन प्रजाभूता मयि सम्भव कर्दम ॥
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ॥
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

आर्द्रांपुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ॥
सूर्यांहिरण्मयीं लक्ष्मींजातवेदो ममावह ॥ १३ ॥
आर्द्रांयःकरिणींयष्टिं पिङ्गलां पद्ममालिनीम् ॥
चन्द्रांहिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १४ ॥
तांमऽआवहजातवेदोलक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं प्रभूतंगावोदास्योश्वान्विन्देयंपुरु
षानहम् ॥ १५ ॥ यःशुचिः प्रयतोभूत्वाजुहुया
दाज्यमन्वहम् ॥ श्रियःपञ्चदशर्चंच श्रीकामःस
ततं जपेत् ॥ १६ ॥ इति श्रीसूक्तं समाप्तम् ।

श्रीः॥सरसिजनिलयेसरोजहस्तेधवलतरेशुभ
गन्धमाल्यशोभे ॥ भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यम्॥१॥ धनमग्निर्ध
नंवायुर्धनं सूर्यो धनंवसुः॥ धनमिन्द्रो बृहस्पतिर्व
रुणं धनमश्विनौ ॥ २ ॥ वैनतेय सोमं पिब सोमं
पिबतु वृत्रहा॥सोमं धनस्य सोमिनो मह्यं ददातु
सोमिनः॥३॥न क्रोधो न च मात्सर्यं न लोभो ना
शुभा मतिः॥ भवन्ति कृतपुण्यानां भक्तानां सूक्त
जापिनाम् ॥४॥पद्मानने पद्मऊरु पद्माक्षि पद्मसं

भवे॥तन्मे भजसि पद्माक्षि यन सौख्यं लभाम्य
हम्॥ ५ ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधव
प्रियाम् ॥ विष्णुप्रियां सखीं देवीं नमाम्यच्यु
तवल्लभाम् ॥ ६ ॥ महादेव्यै च विद्महे विष्णु
पत्न्यै च धीमहि ॥ तन्नो लक्ष्मीःप्रचोदयात्॥ ७॥
पद्मानने पद्मिनि पद्महस्ते पद्मप्रिये पद्मदलाय
ताक्षि ॥ विश्वप्रिये विश्वमनोऽनुकूले त्वत्पादपद्मं
मयि सन्निधत्स्व ॥ ९ ॥ आनंदःकर्दमःश्रीदाश्चि
क्लीत इति विश्रुताः ॥ ऋषयः श्रियः पुत्राश्च

माये श्रीर्देवी देवता ॥ ९ ॥ ऋणरोगादिदारि
द्र्यं पापञ्च अपमृत्यवः ॥ भयशोकमनस्तापा
नश्यन्तु मम सर्वदा ॥ १० ॥ श्रीर्वर्चस्वमायुष्य
मारोग्यमाविधाच्छोभमानं महीयते ॥ धान्यं
धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घ
मायुः ॥ ११ ॥

इति श्रीसूक्तं समाप्तम् ।

# अथ भूसूक्तप्रारम्भः ।

हरिः ॐ भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षंमहित्वा ।
उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥
आयंगौःपृश्निरक्रमीदसनन्मातरंपुनः । पितरं
चप्रयन्त्सुवः ॥ त्रिंशद्धामविराजतिवाक्पतङ्गा
यशिश्रिये । प्रत्यस्यवहद्युभिः ॥ अस्यप्राणाद
पानत्यन्तश्चरतिरोचनाव्यख्यन्महिषः सुवः ।
यत्वाक्रुद्धः परोवपमन्युनायदवर्त्या । सुकल्पम

ग्नेतत्तवपुनः स्त्वोद्दीपयामसि । यत्तैमन्युपरोम्त
स्यपृथिवीमनुंदध्वसे । आदित्याविश्वेतद्देवावस
वश्चसमाभरन् । मेदिनीदेवीवसुंधरास्याद्वसुधा
देवीवासवी । ब्रह्मवर्चसः पितृणांश्रोत्रंचक्षुर्मनः । पृ
थिवीहिरण्यगर्भिणीदेवीपृषोदरी रसनस्त्वायंने
सोद । समुद्रवंतीसावित्रीहनो देवी मह्यगी । म
हीधरणीमहो व्यधिष्ठाश्रृंगे श्रृंगे यज्ञयज्ञेविभीष

---

१ देवीति पाठः । २ प्रसूधरीति पाठः ।

णीं । इन्द्रपत्नी व्यापिनींसुरसारिरिह । वायुमती
 जलशयनीश्रियं धारायासत्यंधोपरिमेदिनीश्वो
परिधत्तंगाया । विष्णुपत्नींमहींदेवींमाधवींमाधव
प्रियाम् । लक्ष्मींप्रियसखींदेवीं नमाम्यच्युतवल्ल
भाम् ॥ ॐ धनुर्धरायैविद्महेसर्वसिद्धयैचधी
महि । तन्नो धराप्रचोदयात् ॥

इति भूसूक्तं समाप्तम् ।

# अथ नीलासूक्तप्रारम्भः ।

हरिः ॐ शांतिःशांतिःशान्तिः शृण्वान्ति श्रोणा
ममृतंस्यगोपांपुण्यांमस्यामुपशृणोमिवाचम् ।मही
देवींविष्णुपत्नीमजूर्यांप्रतीचींमेनाᳬहविषायजा
मः ॥ १ ॥ त्रेधाविष्णुरुरुगायोविचक्रमेमहींदिवं
पृथिवीमंतारिक्षम् । तच्छ्रोणैतिश्रवंइच्छमानापु
ण्यᳬश्लोकंयजमानायकृण्वती । स्योनापृथि
विभवांनृक्षराणिवेशिनी । यच्छांनः शर्मसप्र

नी० थाः ॥२॥ अदितिर्देवागंधर्वामनुष्याःपितरस्सुरा सू
१० स्तेषा ॐ सर्वभूतानांमातामेदिनीमहतामहीसा
वित्रीगायत्रीजगत्युर्वीपृथिवीबहुलाविश्वाभूताक
तमाकायाशासत्येत्यमृतेतिवशिष्ठः । नीलांदे
वीॐशरणमहंप्रपद्ये गृणाही घृतवतीसवितराधि
पत्यैःपयस्वतीरंतिराशांनोअस्तु।ध्रुवादिशांविष्णु १०
पत्न्यघोरास्येशानासहसोयामनोता। बृहस्पति
र्मातरिश्वोतवायुः संधुवानावाता अभिनोगृणन्तु।

विष्टंभोद्दिवोधुरुणंः पृथिव्याअस्यैशांनुाजगंतुोवि
ष्णुंपत्नी । ॐविष्णुपत्न्यैचांविद्महेंश्रीभूसख्यैचं
धीमाहि।तन्नों नीलाप्रचोदयात् ॐ शांतिः ॥ ३ ॥

इति

पुरुषसूक्त-विष्णुसूक्त-श्रीसूक्त

भूसूक्त-नीलासूक्तानि ।

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :


**खेमराज श्रीकृष्णदास**
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर, मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

**खेमराज श्रीकृष्णदास**
६६, हडपसर इण्डस्ट्रियल इस्टेट,पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५, फैक्स -०२०-२६८७४९०७.

**गंगाविष्णु श्रीकृष्णदास,**
**लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो**
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डिंग,
जूना छापाखाना गली, अहिल्यावाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष - ०२५१-२२०९०६१.

**खेमराज श्रीकृष्णदास**
चौक, वाराणसी (उ.प्र.) २२१ ००१. दूरभाष - ०५४२-२४२००७८


KHEMRAJ SHRIKRISHNADASS